Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्री जिनदत्तसूरि प्राचीनपुस्तकोद्धार फन्ड ( सुरत ) ग्रन्थांकः—५०

नमो नाणस्स ॥

श्रीखरतरगच्छालंकार श्रीजिनेश्वरसूरिशिष्य वाचनाचार्य विवेकसमुद्रगणिविरचितं

# श्रीपुण्यसारकथानकम् ॥

( पद्यबद्ध )

gyanmandir@kobatirth.org

जगमयुगप्रधान भट्टारक श्रीमज्जिनकृपाचंद्रसूरीश्वराणां शिष्यरत्न उपाध्याय–पदालंकृत मुनिश्रीसुखसागरोपदेशेन श्रीमहासमुंदवास्तव्य श्रीश्रीमालगोत्रीय श्रेष्ठिमेघराजस्य धर्मपरायणा धर्मपत्नी–सौभाग्यवती–श्रीमती वसंतिबाई–नाम्न्या कृतपंचमीतपोद्यापननिमित्तेन विहितेन द्रव्यसाहाय्येन प्रकाशितं ।

प्रकाशक :—श्रीजिनदत्तसूरि ज्ञानभंडार कार्यवाहक—मु. सुरत.

सं० २००१ भेट

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुद्रकः—
शा. गुलाबचंद लल्लुभाई
श्रीमहोदय प्रेस, भावनगर.

पुस्तकप्राप्तिस्थान—
मेघराज बगतावरमल
जनरल मरचन्ट एन्ड
कमीशन एजन्ट
महासुमुन्द (सी. पी.)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# पाठकों से—

प्रस्तुत " पुण्यसारकथानक " नामक ग्रन्थ में साधर्मिक वात्सल्य का माहात्म्य उत्तम शैली से वर्णित है, इस ग्रन्थ के प्रणेता वाचनाचार्य श्री १००८ **विवेकसमुद्रजीगणि** है, और आपने प्रकृत ग्रन्थ वि० सं० १३३४ में निर्म्माण किया। आपकी बहुमुखी प्रतिभा को हम क्या कहें ? इस लेखिनी में आपकी प्रकाण्ड विद्वत्ता बतलाने की शक्ति कहां ? यहां तो मात्र इतना लिखना ही पर्याप्त होगा, कि आप खरतरगच्छालंकार दादा साहेब श्री जिनकुशलसूरीश्वरजी के विद्यागुरु थे, जैसा कि उनकी चैत्यवंदन कुलकवृत्ति ५१३४ से ज्ञात होता है, यही उनकी उत्तम विद्वत्ता का प्रमाण है।

जैसलमेर के पुरातन ज्ञानभंडार से इतिहास ही श्री अगरचंदजी नाहटा प्रस्तुत ग्रन्थ की प्रतिकृति लाये थे वह एक ही प्रति से प्रस्तुत ग्रन्थ संशोधित कर प्रकाशित हो रहा है। संशोधन परमपूज्य गुरुवर्य्य उपाध्याय श्री श्री श्री १००८ सुखसागरजी महाराज साहेब एवं जेठालालभाई शास्त्रीने बहूत सावधानीपूर्वक किया है। तथापि स्खलना पाठक सुधारें।

ग्रन्थ प्रकाशन कार्य महासमुंदनिवासी श्रीयुत मेघराजजी श्रीश्रीमालजी की धर्मपरायण धर्मपत्नी अ० सौ० श्रीमती वसंतिबाई के तपाराधन के उद्यापन के उपलक्ष में दी हुई आर्थिक सहायता से हो रहा है।

हम चाहेंगे कि सज्जनगण वांचन श्रवण कर ज्ञान वृद्धि कर के आत्मकल्याण करें।

**महासमुंद**
विजयादशमी
सं० २००१

**मुनि मंगलसागर**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## श्रीजिनदत्तसूरि-प्राचीन-पुस्तकोद्धार-फण्डद्वारा मुद्रितपुस्तकानि

गणधरसार्धशतक
आंतरगतप्रकरणम्
जयतिहुअणवृत्तिः
दिवालीकल्पः
प्रश्नोत्तरसार्धशतकम्
विशेषशतकः
संदेहदोलावलीवृत्तिः
पंचलिंगिप्रकरणम्
चैत्यवंदनकुलकवृतिः(त्तिः)
अनुयोगद्वारसूत्रमूलं
कल्पद्रुमकलिकाभाषांतरं

संवेगरंगशाला
श्रीपालचरितं प्राकृत-भाषांतर
द्वादशपर्वव्याख्यानभाषा
जीवचारादि प्रकरणभाषा
कल्याणमंदिरस्तोत्रटीका
भक्तामरस्तोत्रटीका
द्वादशकुलकविवरणं
षट्स्थानप्रकरणम्
धन्यशालिभद्रचरित्रम्
धन्यचरित्रम्
सामाचारीशतकम्

कल्पसूत्र-कल्पलताव्याख्या
प्राकृतव्याकरणं
विधिमार्गप्रपा
सप्तस्मरणटीका
गाथासहस्री
अतिमुक्तकमुनिचरित्रम् ( मुद्रणावस्थायां )
गणधरसार्धशतकवृत्तिः
कल्पद्रुमकलिकाटीका
पुण्यसारकथानकम्
पोषधविधिप्रकरणवृत्तिः

**पुस्तकप्राप्तिस्थानम्—**

**श्रीजिनदत्तसूरि ज्ञानभंडार**, गोपीपुरा, सीतलवाडी उपासरा, मु० **सुरत.**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीस्तंभनपार्श्वनाथाय नमः ॥

वाचनाचार्यविवेकसमुद्रगणिविरचितं ।

# ॥ अथ श्रीपुण्यसारकथानकम् ॥

दानमुख्यचतुष्पादा, पुण्यदुग्धा दयानना । श्रीपार्श्वनाथगीःकाम,-धेनुर्दद्यान्मनोमतम् ॥ १ ॥

श्रीसाधर्म्मिकवात्सल्यं, गर्त्तापूरं दृढं सुधीः । विदध्याद् येन सम्यक्त्व,-प्रासादोऽत्र स्थिरो भवेत् ॥ २ ॥

वात्सल्यादस्थिरा धर्मे, स्थिरतां यान्ति देहिनः । जायन्तेऽतिस्थिरतराः, पूर्वमेव स्थिराः पुनः ॥ ३ ॥

साधुवादोऽपि चेत्थं स्या(त्), वर्त्तन्तेऽप्य(त्र) देशजाः । अप्यनाजातयो जैना, अन्योन्यं सोदरा इव ॥४॥ युग्मम् ॥

दृष्टानां पूर्वमालाप,-मुत्सवादिषु संस्मृतिम् । परिभूतौ परित्राणं, रुजि वैद्यौषधप्रदाम् ॥ ५ ॥

सीदतां वृत्तियोगं च, नोदनं च प्रमादिनाम् । तेन तेषां विनिर्मान्ति, धन्या वात्सल्यबुद्धितः ॥ ६ ॥ युग्मम्

वात्सल्यं दानमुख्यानां, संसारार्णवमज्जकम् । जिनधर्मप्रपन्नानां, तदेव भवतारकम् ॥ ७ ॥

यः स्तोकमपि निर्माति, वात्सल्यं समधर्म्मसु । स शुद्धवासनः पुण्य,-सारवल्लभते शिवम् ॥

तथाहि—

---

१. यथा 'प्रदानं' शब्दं(ब्दः) तथा 'प्रदा'शब्दो द्वितीयान्तः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



[1]दासीयद्देववास्तव्यं, [2]सुधाकुण्डसरोवरम् । [3]कल्पशाखीयमानद्रु, बभौ स्वर्णपुरं पुरम् ॥ ९ ॥
प्रासादा यत्र [4]जैनेशा, जनदृष्टिमृगा बलेः(मृगावलेः) । रेजुरानन्दहेतुत्वा,-दपूर्वा वागुरा इव ॥ १० ॥
[5]दयादाक्षिण्यनीत्यादि,-धामानन्दितभूतलः । [6]जिनचन्द्रोऽभवच्चन्द्र, इव श्रेष्ठ्यत्र [7]सद्वसुः ॥ ११ ॥
रूपं निरुपमं यस्याः, शीलमाश्चर्यमन्दिरम् । सौभाग्यमस्त्यरो(हो)काम्यं, साऽस्य शीलवती प्रिया ॥ १२ ॥
तयोरार्हतधर्म्मैक,-तानयोस्तनयोऽभवत् । धर्मसाराभिधो भोग,-भङ्गीषु सततं रतः ॥ १३ ॥
[8]भवकष्टोत्कराराम,-वारिदान् व्यसनान्यलम् । सेवन् जज्ञे धर्म्मसारः, प्रमत्तो धर्म्मकर्म्मणि ॥ १४ ॥
शालिदाल्यादिकं भोज्यं, कृत्वा तात्कालिकं वरम् । निःस्वादूकृतपीयूषं, नानाभङ्गिभिरद्भुतम् ॥ १५ ॥
परिवेष्य सदा वक्ति, बोधाय जननी सुतम् । जेमन् [9]पर्युषितं नित्यं, वत्स दुःखी भविष्यसि ॥ १६ ॥ युग्मम् ।
ततोऽवादीत्सुतो मात,-र्भोज्यं तत्कालनिर्मितम् । दत्वा पर्युषितं वक्षि, किमेवं पुरतो मम ? ॥ १७ ॥
तूर्ष्णींभूय तदा माता, भूयोऽपि प्रतिवासरम् । परिवेष्याशनं पूर्वं, तदेवावोचतात्मजम् ॥ १८ ॥

---

१. दासीयन्तः कोऽर्थः ? दासतुल्याः देववास्तव्या यत्र तत् । २. सुधाकुण्डवत् आचरन्ति सुधाकुण्डतः सुधाकुण्डन्ति सरोवराणि यत्र । ३. कल्पशाखीयमानाः, कोऽर्थः ? कल्पवृक्षतुल्याः द्रवो वृक्षा यत्र तत् । ४. जिनेशस्य इमे जैनेशाः । ५. दयादाक्षिण्यनीत्यादीनां धाम तेजः तेन आनन्दितभूतलः । ६. जिनचन्द्रनामा श्रेष्ठी । ७. वसूनि किरणानि यस्य वसुः(सु) द्रव्यं यस्य । ८. भवकष्टस्य उत्कराः—समूहाः, त एव आरामाः, तेषु वारिदाः, तान् ॥ ९. पर्युषितं—शीतं अन्नम् ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वाचोऽस्या उदिते तत्त्वे, मातर्भोक्ष्येऽद्य नान्यथा । एवमाग्रहमाधाया,-व्रतस्थे तनयोऽन्यदा ॥ १९ ॥
मातोचे मम वाचोऽस्या,-स्तत्त्वं पृच्छाधुनाऽऽगतम् । उद्याने ज्ञानपाथोधिं, श्रुतसागरसाधुपम् ॥ २० ॥
तत्पार्श्वे सोऽगमद् याव,-च्छ्रीसूरिः स्वयमेव हि । बभाषे तावदेतं त्वं, सन्देहं प्रष्टुमागमः ॥ २१ ॥
सिद्धचेटकमातङ्ग,-श्रावकः स्थावराभिधः । सौभाग्यपुरवास्तव्यः, सन्देहं तेऽपनेष्यति ॥ २२ ॥
अहो ! आश्चर्यमाश्चर्यं, यज्ज्ञानाम्भोधिरप्यसौ । प्रेषयामास मातङ्ग,-पार्श्वे मां संशयच्छिदे ॥ २३ ॥
तद्धेतुनेह केनापि, भाव्यं कार्यमदो मम । बुधादेशाः कृता नृणां, शुभ(भो)दर्का[1] भवन्ति यत् ॥ २४ ॥
विचिन्त्यैवं(वं स) सौभाग्य,-पुरं प्रस्थितवान् द्रुतम् । तृष्णार्त्तः प्राप्य पीयूषं, किमाकण्ठं न[2] पात्यलम् ? ॥ २५ ॥
॥ त्रिभिर्विशेषकम् ॥
सुरेन्द्रपुरसौभाग्य,-कमलाकेलिसद्मनः । श्रीसौभाग्यपुरस्याप, धर्म्मसारो बहिः क्रमात् ॥ २६ ॥
वि[3]रसीकृतपीयूष,-रसान् चारुरसाम्भसः । सरोव्रातान् महल्लो(हालो)ल,-हस्तैराह्वयतः किल ॥ २७ ॥

---

१. शुभ(भो)दर्काः, कोऽर्थः ? आदेशकरणकाले शुभफलप्रदा भवन्ति । २. अपितु न रक्षत्येव ( "न पिबत्यलम्" इतिपाठः संभवति) । ३. 'विरसीकृत' इत्यादित्रिभिः श्लोकैः सम्बन्धः । धर्मः की० पश्यन् कर्म सार(सरो)व्रातान्-सरोवरसमूहान् । की० चारुरसानि अम्भांसि-जलानि येषु तान् । आह्वयतः । कैः ? महाकल्लोलहस्तैः । तथा पश्यन् कर्म आरामसञ्चयान् । की० गृहीतं नन्दनवनस्यामान-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गृहीतनन्दनामान,-मानानारामसञ्चयान् । प्राकारं स्फाटिकं क्षिप्त,-शीतांशुग्रहतारकम् ॥ २८ ॥
पश्यन्नानन्दपीयूष,-ह्रदमग्न इवासकौ । धूनं-धूनं शिरोऽस्तावी,-द्देवानामनिमेषताम् ॥ २९ ॥ त्रिभिर्विशेषकम् ॥
विमानितविमानानि, सदनानि विलोकयन् । प्रविवेश पुरं चित्रा-श्चर्यविभ्रममन्दिरम् ॥ ३० ॥
रत्नकाञ्चनरूप्यादि,-वस्तूनामाकरानिव । आगतान् विपणीमूर्द्ध,-ग्रीवो यावद्विलोकते ॥ ३१ ॥
जराजर्जरसर्वाङ्गं, सितरोमकचोच्चयम् । मांसशोणितनिर्मुक्तं, शुष्कार्कतरुसोदरम् ॥ ३२ ॥
नितान्तं लम्बमानाग्रै,-र्नासिकाकचसञ्चयैः । निराबाधप्रदेशस्थै,-र्हरित्पूरैरिवाचितम् ॥ ३३ ॥
सदा कर्मकृतेर्मूल,-घृष्टहस्तनखोत्करः । असंस्कृततया लम्बै,-र्भीष्मं पादनखैरलम् ॥ ३४ ॥
स त्वतः कम्प्रपाणिभ्यां, तुषमुख्यापनुत्तये । धान्यादिपिटिका गुर्वी,-रुत्क्षिपन्तं महानिले ॥ ३५ ॥

मानं प्रभूतमानं यैस्ते तान् । तथा पश्यन् कर्म प्राकारं क्षिप्ता निराकृताः शीतांशुग्रहतारका यत्र धर्मसाराः । की० आनन्दपीयूषद्रहे निमग्नः असौ अस्तावीत् कर्म देवानां अनिमेषताम् । किं कुर्वन् ? धूनन् धूनन् कर्म शिरः व्याप्तम् । २. विमानित०=अवगणित० । ३. हट्टश्रेणिं । ४. अवलोकते श्रेष्ठी । की० ऊर्द्धग्रीवः कर्म विपणीन् हट्टान् । उत्प्रेक्षते रत्नादीनां आकरान् । की० आगतान् इव । ५. स तु श्रेष्ठी अतः । ६. पक्षतः धर्मसारः कर्म श्रेष्ठिनां(नं) की० उत्क्षिपन्तम्=उड्डापयन्तं कर्म धान्यादिपिटिकाः । की० गुर्वीः । क ? महाव्रतप्रदेशे । कस्मै ? तुषकीटकमुख्यानां स्फेटनाय । काभ्यां ? कम्प्रपाणिभ्यां । कस्मात् उड्डापयन्तं, अतः कोऽर्थः ? धान्यसञ्चयात् ।



For Private and Personal Use Only

आत्तक्रयाणकद्रव्यं, याचमानै[1]र्जनैः समम् । क[2]लहायमानं दुर्वाग,-विसरैर्मर्मवेधिभिः ॥ ३६ ॥
नानास्थानकसंस्यू[3]ता,-तिशटितमलीमसम् । अद्रोद्धाटपुतं छिद्रा,-कीर्णं बिभ्रतमंशुकम् ॥ ३७ ॥
मा यासीदिति निर्मूल्य,-सुरत्नमिव यत्नतः । अर्द्धघृष्टं घुण्टपूगं, बध्नन्तं, वसनाञ्चले ॥ ३८ ॥
विमुक्तं दानभोगाभ्यां, तद्धनत्वेन लोकतः । प्रसिद्धिप्राप्तकृपण, पितामहान्यनासकम् ॥ ३९ ॥
श्रेष्ठिनं धनसाराख्यं, कस्मिंश्चिद् विपणावसौ । दुर्गन्धातिमलक्लिन्न,-शरीरं तावदैक्षत ॥ ४० ॥ दशभिः कुलकम् ॥
पप्रच्छ धर्मसारस्तं, कुत्रास्ति स्थावराभिधः । मातङ्गः श्रावकः सिद्ध,-चेटकः सर्वतत्त्ववित् ॥ ४१ ॥
यद्द्वारे चिञ्चिकावृक्षो, विद्यते निष्ठ्यपाटके । सदनं स्थावरस्या[4]दो, ज्ञेयमित्यूचिवानसौ ॥ ४२ ॥
धर्मसारो द्रुतं प्राप्तः, स्थावरस्य निकेतनम् । उक्त्वा स्वमातृगीर्मुख्यं, वृत्तान्तं सर्वमात्मनः ॥ ४३ ॥
ज[5]गाद स्थावरैतं मे, सन्देहं स्फोटयाञ्जसा । उदिते पद्मिनीबन्धौ, तमस्तिष्ठति किं क्वचित् ? ॥ ४४ ॥ युग्मम् ॥
उ[6]द्यत्सर्वाङ्गरोमाञ्चो, विकचा[7]म्बुजलोचनः । सहर्षः स्थावरोऽवादी,-ल्लब्धशेवधिर्नि[8]ःस्ववत् ॥ ४५ ॥

---

१. जनैः की०? याचमानैः कर्म-गृहीतं क्रयाणकस्य द्रव्यम् । २. कलहं कुर्वन्तम् । ३. स्फटितम् । ४. अदः=एतत्सदनम् । ५. जगाद धर्मसारः हे स्थावर ! इदं संदेहं स्फेटय । ६. उद्यन्ते(न्ति)सर्वाङ्गरोमाञ्चानि यस्यासौ उ० । ७. विकचः(चे) विकस्वरः(रे) अम्बुजवत्लोचने यस्य सः । ८. निर्द्रव्यवत् लब्धकोशः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अद्य मे फलितं भाग्य,-मद्योदैत् सुदिनं मम । सानुकूलो विधिर्मेऽद्य, यत्सधर्मेक्षितो भवान् ॥ ४६ ॥
पितृमात्रादिभिः प्राणी, संयुज्येत भवे भवे । अमितैः सुकृतैः किन्तु, सम्बन्धः [१]समधर्मणा ॥ ४७ ॥
तज्ज्ञानं तद्धनं शक्तिः, सा कलाकौशलं च तत् । तव साधर्म्मिकस्यार्थे,-ऽधुना व्यापारयेऽस्मि यत् ॥ ४८ ॥
अद्य त्वं मेऽतिद्वि(थि)र्भूयाः, कार्या न प्रार्थनाऽन्यथा । किं कस्यापि हि कल्पद्रु,-र्विफलीकुरुतेऽर्थिनम् ॥ ४९ ॥
धर्म्मसारोऽथ तं स्माह, पेशलं भवतोदितम् । विरुद्धं [२]निजजातेर्मे,-ऽदः कर्त्तुमुचितं कथम् ? ॥ ५० ॥
स्थावरोऽथाभ्यधाद् बन्धो !, जानानः श्रुतमार्हतम् । नास्मि जातिविरुद्धं ते, करिष्यामि कथञ्चन ॥ ५१ ॥

यत उक्तं कल्पे—

[३]लोउत्तरंमि वि ठिया, न लोगनिवाहरुत्तिमिच्छंति । लोगजढे परिहरओ, तित्थवि बुड्ढी विवन्नो य ॥ ५२ ॥
अतोऽहं कृपणपिता,-महाट्टे तव भोजनम् । दापयिष्ये न कार्यो मे, भावभङ्गस्त्वया पुनः ॥ ५३ ॥
भावभङ्गोऽस्य भून्मेति, श्रेष्ठिसूस्तद्वचोऽखिलम् । अमंस्त [४]सत्तमा यस्मा,-द्दाक्षिण्याम्भोधयो भृशम् ॥ ५४ ॥

१. समधर्मणा, कोऽर्थः ? तुल्यधर्मणा अत्रशब्दः । २. निजजातेः, कोऽर्थः ? वणिग्जातेः अदः भोजनं विरुद्धं कर्त्तुं कथमुचितम् ? । ३. 'लोउत्तरंमि वि ठिया' कोऽर्थः ? लोकोत्तरमार्गे, कोऽर्थः ? जैनमार्गे स्थिता नराः । न लोकबाह्यां युक्तिं इच्छन्ति । लोकविरुद्धपरिहारकस्य नरस्य तीर्थवृद्धिर्भवति । तथा विशिष्टवर्णः । कोऽर्थः ? यशश्च भवति । ४. सत्पुरुषाः ।



For Private and Personal Use Only

सहर्षं स्थावरोऽथैत,-मभ्यधान्मधुराक्षरम् । भुक्त्वाऽऽगच्छेर्यथा सद्योऽ,-पनये तव संशयम् ॥ ५५ ॥
आगत्य थावरेणाथ, भोजनं कृपणापणे । यथेच्छं दापितं चारु, धर्मसाराय सादरम् ॥ ५६ ॥
कृपणेनापि तद्दत्त्वा, पाकार्थद्रव्यलोभतः । स्वगृहे प्रैष्यसौ लोभा,-भिभूतः किं न कारयेत् ॥ ५७ ॥
धर्मसारो विशन् गेहे, श्रेष्ठिन्यैक्ष्योपलक्ष्य च । ऊचे त्वं(त्वं मे) पितृभ्रातृ,-पुत्रो भ्राता ततो मम ॥ ५८ ॥
वारिधेरिव चन्द्रेण, त्वयाऽऽनन्दोऽद्य मेऽजनि । भोक्तव्यं मामकं भ्रात,-र्भोजनं स्नेहतोऽधुना ॥ ५९ ॥
अभ्यधाद्धर्म्मसारोऽथ, भग्निः (भगिनि) ! साधूदितं त्वया । परं स्थावरतो लब्ध,-मद्य भोक्ष्यस्मि( भोक्ष्यामि ) भोजनम् ॥ ६० ॥
जगाद श्रेष्ठिनी भ्रात,-र्न युक्तं भवता कृतम् । आत्तं चण्डालदत्तं यद्, भोज्यं लज्जेऽस्मि सर्वतः ॥ ६१ ॥
धर्मसारोऽभ्यधाद् भग्नि !, मम साधर्म्मिकोऽसकौ । अस्य पार्श्वे च कार्येणा,-हमागामिति हेतुना ॥ ६२ ॥
मयाऽऽत्तं भोज्यमेतस्य, चण्डालस्याप्यतः परम् । यदि त्वं भाषसे किञ्चि,-त्तदा मे शपथोऽस्ति ते ॥६३॥युग्मम्॥
भ्रातुर्विज्ञाय निर्बन्धं, दुर्भेदं श्रेष्ठिनी ततः । भोज्यं पक्त्वा तदेवैतं, भोजयामास भक्तितः ॥ ६४ ॥
भुक्त्वा यावद् व्रजत्येष, स्थावरीयं गृहं प्रति । अशृणोत्तावदाक्रन्दं, तत्रातिविरसस्वरम् ॥ ६५ ॥

---

१. स्फेटयामि । २. आत्तं=गृहीतम् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सोऽप्राक्षीन्नरमायान्तं, किमाक्रन्दोऽतिदुःश्रवः ? । तेनोचे स्थावरः कीर्त्ति,–शेषोऽभूच्छलतोऽधुना ॥ ६६ ॥
वज्रेणेव हतोऽत्यन्तं, विच्छायवदनो हृदि । धर्मसारस्तदा दध्या,–वहो ! हा ? मे रिपुर्विधिः ॥ ६७ ॥
दुष्कर्मदन्तिना वाञ्छा,–लता मे सकला अपि । कथं चूर्णीकृताः सद्यो, यत्नश्च विफलोऽभवत् ॥ ६८ ॥
विमना[1] धर्मसारोऽथ, भग्नीमेत्येत्यभाषत । निजे यास्याम्यहं गेहे, विपन्नः स्थावरो यतः ॥ ६९ ॥
साश्रुः[2] साऽभाषत भ्रात,–स्तिष्ठ श्वस्तनवासरम्[3] । तदा(वा)तिथ्यं विधायास्मि, हृष्टं[4] स्वं विदधे यथा ॥ ७० ॥
किञ्चात्र जिनचैत्यानि, साक्षाच्चिन्तामणीनिव । अनाराध्य कथं यासि, भ्रातर्निष्पुण्यमौलिवत् ॥ ७१ ॥
दन्तैर्लात्वाङ्गुलीर्भूयो,–प्यूचे सा श्च्योतदश्रुका[5] । श्वस्तनं दिवसं भ्रात,–रत्र(त्र)स्थेयं यथा तथा ॥ ७२ ॥
कल्पायमानयामोऽपि[6], विमना अपि नै(नि)ष्प्रभः । गाढभग्नीवचोरश्मि,–बद्धो भ्राताऽवतस्थिवान् ॥ ७३ ॥
ततः प्रातर्द्वितीयेऽह्नि, श्रेष्ठिनी विपणौ स्वयम् । गत्वोचे श्रेष्ठिनं वाचा,श्च्योतन्त्येव सुधारसम् ॥ ७४ ॥
शालिदालिसुगन्धाज्य,–प्रमुखं वस्तु देहि मे । यथा स्वभ्रातुरातिथ्यं, विदधे ते प्रसादतः ॥ ७५ ॥

---

१. विमनाः=भग्नमनाः । २. सह अश्रुभिर्वर्त्तते साश्रुः । ३. प्रभातदिनम् । ४. सहर्षम् । ५. श्च्योतन्ति अश्रूणि यस्याः सा० । ६. विंशतिकोटाकोटिसागरैः कृत्वा एकः कल्पः । तथा दशकोटाकोटिपल्योपमैः कृत्वा एकः सागरः । कल्पवत् आचरति कल्पायमानः, कोऽर्थः ? कल्पसंख्याप्रमाणो यामः=प्रहरो यस्य सः ।



For Private and Personal Use Only

भक्षितो वृश्चिकेनेवो,-च्छलन् कोपारुणेक्षणः । भैरवारवमाचष्टे, कृपणो वल्लभां प्रति ॥ ७६ ॥
याचके गृहमायाते, ब्रुवेऽहं किमसौ च कः । गृहे सेम(मम)समायातो, दुःखान्यादाय याहि मे ॥ ७७ ॥
चटितुं द्वारि कस्यापि, न ददे स्वगृहे सदा । संतिष्ठे मूर्छित इव, केनचिद्गाढमर्षितः ॥ ७८ ॥
न धर्मे काकिणीमात्र,-मपि वित्तं व्ययाम्यहम् । निधाने निदधे किन्तु, बिलेऽन्नं कीटिका इव ॥ ७९ ॥
नागस्येव शिरोरत्नं, मृगारेरिव केशरान् । बान्धवा अपि न स्प्रष्टुं, शक्नुवन्ति धनं मम ॥ ८० ॥
दूरदेशाच्चिरायातो,-ऽतिनिःस्वो विपदं गतः । प्रियोऽपि सोदरो भ्राता, बिभ्रदाशां गृहेऽविशत् ॥ ८१ ॥
अर्धचन्द्रेण वैरीव, गृहान्निष्कासितो न किम् ? । सीदन्मैनष्कं त्वं, (वेत्सीदं किं न मत्कं त्वं) श्व(ह्य)स्तनमपि चेष्टितम् ॥ ८२ ॥ युग्मम् ॥
अक्षतादि निषेध्यान्य-त्तुलसी देववेश्मनि । न(त)व यान्त्या अनुज्ञाता, तत्किं न बहुमन्यसे ? ॥ ८३ ॥
शालिदाल्यादि देहीति, ब्रुवन्त्यास्तव तत्क्षणात् । मस्तकादापदान्तं मे, शूलमायाति दुस्सहम् ॥ ८४ ॥

---

१. हे मण्डल ! किं समायातः ? । ( त्र्यशींतितमश्लोकस्यायमर्थः ज्ञेयः ) अनुज्ञाता, कर्म-तुलसी, केन ? मया निषेध्य, कर्म-अन्यत्, अन्यत् किं० स्तु अक्षतादि, कस्य ?, तव, क ? देवगृहे, इत्यर्थः । २. लोहडियाविंशतितमो भागः काकिणी उच्यते । ३. मनःसम्बन्धिम् ( मम संबन्धि ) ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुलीना अनुवर्त्तन्ते,-ऽभिप्रायं स्वपतेः सदा । सतीनामिह योषानां, पतिरेव हि देवता ॥ ८५ ॥
मम प्राणहरः शालि,-दाल्यादिद्रविणव्ययः । न ते कारयितुं युक्तो, रक्षन्त्याः स्वकुलीनताम् ॥ ८६ ॥
बन्ध(न्धु)स्नेहग्रहग्रस्ता, चेत्कथञ्चिन्न तिष्ठसि । तदा भुङ्क्तां मया सार्द्धं, तैलवल्लानसावपि ॥ ८७ ॥
अथ भाद्रपदाम्भोदाऽऽ,-नना गद्गदनिःस्वना । नितान्तप्रक्षरन्नेत्रा, श्रेष्ठिनी न्यगदत्पुनः ॥ ८८ ॥
यत्र संपद्यते श्रद्धा, त्रिदशाधिपतेरपि । तादृग्भोज्यं सदा भुङ्क्ते, भ्राता मेऽपि स्वसद्मनि ॥ ८९ ॥
कुभोज्यं ददतीदृक्षं, स्वभ्रात्रेऽस्मि स्वबन्धुषु । कुत्र दर्शयितुं शक्ता, मुखं लज्जामलीमसम् ? ॥ ९० ॥
कुपितः कृपणोऽवादी,-द्धनं यस्य क्रमागतम् । तस्य चैव यतो न स्या,-दाबाधा काऽपि चेतसः ॥ ९१ ॥
घर्षं-घर्षं भृशं पाणि,-पादमात्मीयमन्वहम् । नारकेणेव कष्टेनो,-पार्ज्यं तद्द्रविणं मया ॥ ९२ ॥
अम्भोधिवद्गभीराया,-स्तटिन्याः परतीरतः । मया माघनिशीथेऽध्या,-नीय विक्रीतमिन्धनम् ॥ ९३ ॥
ललाटन्तपमार्त्तण्डे, भीष्मे ग्रीष्मेऽप्यर(रु)न्तुदैः[1] । किरणैर्लकुटैर्बाढं, हन्यमानो निरन्तरम् ॥ ९४ ॥
धाराधरीभिराराभि,[2]-रिव धाराभिरन्वहम् । तुद्यमानो[3] दूरदेशा,-न्मूर्द्धानैषं[4] कणाद्यहम् ॥ ९५ ॥ युग्मम् ॥
पेषखण्डनपानीया,-नयनाद्यैः कुकर्म्मभिः । चतुष्कं धनकोटीनां, मयाऽमेल्यतिकष्टतः ॥ ९६ ॥

---

१. अर(रु)न्तुदैर्मर्मवेधिभिः । २. मेघसत्काभिः । ३. पीड्यमानः । ४. आनैषं, कोऽर्थः ? आनीतवान् ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किञ्च कान्ते ! न जानासि, विमूढा स्त्रीस्वभावतः । महत्या आपदः सद्य,–श्छुद्य(द्य)तेऽर्थप्रभावतः ॥ ९७ ॥
धनिनां दूरतोऽप्येत्य, बान्धवीस्युर्द्विषोऽपि हि । निर्धनानां रिपूस्युर्य,–त्प्रीतिमन्तोऽपि बान्धवाः ॥ ९८ ॥
न किञ्चिच्चित्रमेतद् य–न्निर्धनं तृणवन्नरम् । मन्यते जनतैषाऽपि, यत्स्वं पांशूपमं स्वयम् ॥ ९९ ॥
प्रवृत्तः पूरणायैवा,–प्रयोज्यत्वं सतां व्रजन् । अर्थशून्योऽपि शब्दोऽपि, निन्द्यते किं पुनः पुमान् ॥ १०० ॥
सैवैषा धीर्हृषीकाणां, तदेव निखिलं बलम् । तदेव च वचो व्यक्तं, ख्यातं नाम तदेव च ॥ १०१ ॥
हस्तपादशिरोमुख्या,–स्त एवावयवाः समे । पुमान् स एव सर्वाङ्ग,–सुन्दरो नीतिकोविदः ॥ १०२ ॥
तदेव नगरं स्वीयं, त एव च जना अपि । अन्यादृक् तत्क्षणात्प्राणी, दृश्यते ही धनक्षयात् ॥१०३॥त्रिभिर्विशेषकम्॥
स्वामिभृत्यविभागो यो, दृश्यते भुवनेऽखिले । सोऽपि संपद्यते नूनं, श्रीप्रसादात्प्रसादतः ॥ १०४ ॥

---

१. अबान्धवा बान्धवाः स्युर्बान्धवीस्युः, इत्यर्थः । २. अरिपवः रिपवः स्युः रिपूस्युः । ३. मन्यते, कर्त्री–जनता=लोकः, कर्म–नरं, की० निर्धनं, की० तृणवत्, यत्–यस्मात् एतत् न किञ्चिच्चित्रम् । तथा मन्यते, कर्म–एष नरः, की० निर्धनः, कर्म–स्वं=आत्मानं, कर्त्रा–स्वयं आत्मना, की० स्वं=आत्मानं पांशूपमं, कोऽर्थः ? एण तुल्यम् । ४. स नरः संपन्नः पूरणाय । ५. निन्द्यते, कर्म–शब्दः । की० अर्थशून्यः, की० पूरणाय प्रवृत्तः, की० सतां पण्डितानां अप्रयोज्यत्वं स्वजनः । तथा किं पुनः पुमान् । कोऽर्थः ? यत् पुमान् अर्थशून्यः=द्रव्यरहितः पुमान् निन्द्यते ततः किमुच्यते ? ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



असन्तोऽपि गुणा यस्यां, सत्यां वृष्टाविवाङ्कुराः । स्युर्यान्त्यां यान्ति सन्तोऽपि, त्याज्या सा स्यात्कथं रमा?॥१०५॥
शाल्यादिवेचनादेतद्, गुणरत्नैकरोहणम् । धनं न स्फेटये मूढे !, भवत्या वचनादहम् ॥ १०६ ॥
भूयो वक्ष्यसि चेत्किञ्चि,-तदा भङ्क्ष्यामि ते मुखम् । इत्युक्त्वा कृपणः क्रुद्धो, मौनमास्थाय तस्थिवान् ॥१०७॥
स्थालीबुध्नाननाऽजस्रं, श्रवद्भिर्बाष्पसञ्चयैः । पङ्किलां कुर्वती भूमिं, चिन्तयामास सा ततः ॥ १०८ ॥
अन्यस्मिन् सदने कर्म, कुर्वती कर्मकर्यपि । यादृशं लभते भोज्यं, तादृशं नोत्सवेऽपि मे ॥ १०९ ॥
रथ्यादिपतितैः शीर्ण,-जीर्णैरनुपकारिभिः । चीरैः कन्थे विधायाऽस्मि, संवृणोम्यङ्गमात्मनः ॥ ११० ॥
²भूषा आददिरेऽनेन, लब्धाः पितृगृहादपि । ³साधव्यसूचिकाः काच,-मणिका अपि नो करे ॥ १११ ॥
अक्षता नैव पश्चापि, दत्ता देवगृहे मया । दग्धापि बट्टिका भिक्षो,-र्न कस्यापि कदाचन ॥ ११२ ॥
चातुर्मासिकमुख्येऽपि, कस्मिंश्चिन्न सुपर्वणि । काणं कपर्दकमपि, धर्मे वेचयितुं लभे ॥ ११३ ॥
धर्मार्थकामशून्याया, मालत्या इव कानने । निखिलं जीवितं जन्म, बभूव विफलं मम ॥ ११४ ॥
कार्यमस्य मयाऽऽतिथ्यं, निजभ्रातुर्यथा तथा । इत्यालोच्याथ साऽन्याट्टे, जगृहे शालिमुख्यकम् ॥ ११५ ॥

---

१. असन्तोऽपि गुणाः स्युः, यस्यां रमायां सत्यां । तथा रमायां सत्यां(यान्त्यां) सन्तोऽपि गुणा यान्ति सा रमा=लक्ष्मीः त्याज्या यथा वृष्टौ सत्यां भौसौ(भूमौ) अङ्कुराः स्युः । २. पितृगृहलब्धानि आभरणानि अनेन मम भर्त्रा गृहीतानि । ३. साविधवत्व(सधवात्व)काः । सूचिः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सद्म गत्वा पचत्येषा, यावद् भोज्यं सुभङ्गिकम् । विपणेस्तावदायातः, कृपणोऽवोचत पियाम् ॥ ११६ ॥
अद्यार्द्धपलिकातैल,-मानीतं मयकाऽऽपणात् । यथा स्याद् बहु सर्वेषां, वल्ला राद्धाः किमु प्रिये ! ॥ ११७ ॥
तयोचे प्रिय ! सर्वेषां, निमित्तं शालिमुख्यकम् । अद्य राद्धमतो भाव्यं, भवता(तो)ऽप्येतदेव हि ॥ ११८ ॥
एतत्कान्तावचः श्रुत्वा, [1]श्रुतितप्तत्रपूपमम् । क्रुद्धोऽप्यन्तरदोऽप्याशु, देहीत्यथ स [2]ऊचिवान् ॥ ११९ ॥
ततः कान्ताऽवदत्कान्त !, क्षणमेकं प्रतीक्ष्यताम् । घृतपूरयुगं याव-दिदमुत्तारयाम्यहम् ॥ १२० ॥
वाचेति विद्युतेवैष, हतो दष्टोऽहिनेव वा । मूर्च्छितस्तत्क्षणादेव, पपात पृथिवीतले ॥ १२१ ॥
कथञ्चिल्लब्धसञ्ज्ञोऽसौ, वह्निज्वालास्ववस्थितः । सर्वदेहोल्लसद्दाहः, कोपादित्थमभाषत ॥ १२२ ॥
[3]डाकिनी भवती नूनं, छलनैकपरायणा । द्रविणं जीवितं मे यत्, सकलं नयति क्षयम् ॥ १२३ ॥
चामुण्डे ! दुष्टतुण्डे ! त्व,-मानीता निजपाणिना । स्वसद्मखननीदोषं, ददे कस्य ततोऽधुना ॥ १२४ ॥
त्वदीयं चेष्टितं क्रूरं, सदा दुःखनिबन्धनम् । विलोक्य राक्षसीं भद्रां, त्वत्तो मन्येऽहमन्वहम् ॥ १२५ ॥

---

१. श्रुति०(तः)त्रपू० त्रपुणा उपमा=उपमानं यस्य तत् । २. परं स कृपणः ऊचिवान्, की० कृपणः ? अन्तः=हृदि क्रुद्धः, कर्म-आशु=शीघ्रं ( अदः=इदम् ) शालिदाल्यादिकं देहि मे इत्यूचिवान्, इत्यर्थः । ३. भवती त्वं, की० डाकिनी ।



For Private and Personal Use Only

अ[1]कर्णा पृथु[2]भोगा त्वं, द्विजिह्वा वक्रगामिनी । [3]कस्य संपद्यते(से) नैव, सर्प्पिणीव भयङ्करा ? ॥ १२६ ॥
अम्भांस्यम्भोनिधेर्मातुं, चुलकैश्चिरजीविभिः । शक्यते सुखतो नूनं, न दोषास्तत्र कैश्चन ॥ १२७ ॥
इत्यादि दुर्वचः क्षिप्त्वा, मृदू शून्यौ करावुभौ । नितान्तं कुट्टयन् वक्षो, दध्य(ध्यि)वानित्यसौ ततः ॥ १२८ ॥
यदेवं गृहकुद्दाला, खादिका मम गेहिनी । तन्नूनं दिवसैः स्तोकै,-र्नष्टो मेऽर्थोऽखिलोऽपि हि ॥ १२९ ॥
एषा कान्ताछलात्स[4]द्म,-वर्त्तिनी मम वैरिणी । यन्मां निर्नामकं कर्त्तुं, प्रवृत्तैवमहर्निशम् ॥ १३० ॥
चाण्डालादपि निस्त्रिंशा, मम नूनं नितम्बिनी । खड्गघाताधिकां पीडां, यन्मे[5]ऽवैन्नार्थखादने ॥ १३१ ॥
गतसर्वस्ववच्चित्ते, ध्यात्वैवं कृपणो बहु । विच्छायो मुखमाच्छाद्य, गत्वान्तर्गृहमस्वपत् ॥ १३२ ॥
दुःश्रवं दुर्वचस्तादृक्, श्रुत्वापि श्रेष्ठिनी पुनः । वात्याभिर्मेरुचूलेव, न किञ्चिद्विकृतिं ययौ ॥ १३३ ॥
भर्त्तरि प्रतिकूलेऽपि, [6]सत्यो भक्तिं वितन्वते । शर्करा भक्ष्यमाणाऽपि, विरसत्वं समेति किम् ? ॥ १३४ ॥
तादृग्द्रव्यव्ययात्यन्त,-परिपीडितचेतसः । कृपणस्यास्य संघट्टो, हृदयेऽजनि तत्क्षणात् ॥ १३५ ॥

---

१. न विद्येते कर्णौ यस्या सा । २. पृथु=पृथुलं भोगं=शरीरं यस्याः सा पृथुभोगा । ३. कस्य त्वं की० भयङ्करा न संपद्यसे ।
४. सद्मनि वर्त्तत एवंशीला सद्मवर्त्तिनी । ५. न अवैत्–न जानाति स्म एषा मम पीडां अर्थखादने । ६. सत्यो–महासत्यः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कदर्येण वयं भीम,-मग्रतोऽपि हि नारकम् । इयन्तं समयं याव,-दुःखमेतेन [1]साहिताः ॥ १३६ ॥
अधुनैष स्वकान्तायां, रौद्रचित्तोऽतिवर्त्तते । तन्न [2]नोऽत्र-शुभं स्थातु,-मित्यसौ मुमुचेऽ[3]सुभिः ॥ १३७ ॥ युग्मम् ॥
परिपूर्णां रसवतीं, विधाय श्रेष्ठिनी पुनः । [4]विधृत्य विष्टरेऽदासीत्, पुरश्चतुष्किकाद्वयम् ॥ १३८ ॥
[5]सशर्करपयश्चारु,-गिराऽथ श्रेष्ठिनी जगौ । प्रसद्यागच्छ कान्ताशु, सबन्धु[6]र्भुङ्क्ष्व भोजनम् ॥ १३९ ॥
अदत्तप्रतिवाच्यस्मि, रुषितत्वादभाषणम् । ज्ञात्वोचे श्रेष्ठिनी नाथ ! [7]रुषो नावसरोऽधुना ॥ १४० ॥
भूयोऽप्यालापितेऽमुष्मि,-न्नकृतप्रतिभाषिते । श्रेष्ठिनो मुखमुद्घाट्य, यावदेषा विलोकते ॥ १४१ ॥
तावद्विलोकयामास, नि[9]ष्पन्दवदनेक्षणम् । श्रेष्ठिनं कृपणपिता,-महं [10]कीनाशसद्मगम् ॥ १४२ ॥ युग्मम् ॥
स्वपतेर्नामशे[11]षत्वं, कार्प्पण्यं चातिदारुणम् । निगद्य श्रेष्ठिनी भ्रात्रे, पुनरित्थमभाषत ॥ १४३ ॥
अपुत्रस्य चतस्रोऽस्य, विद्यन्ते धनकोटयः । यथा राजकुले नैता, यान्ति यत्नं तथा दधे ॥ १४४ ॥

---

१. साहिताः, कर्त्तारो-वयं, प्राणाः, कर्म-भीमं=रौद्रं नारकदुःखं । कथं ? इयन्तं समयं यावत् । कथं अग्रतः केन ? एतेन कदर्येण । २. नोऽस्माकं न अत्र शुभं स्थातुम् । ३. प्राणैः । ४. विधृत्य, कर्म-विष्टरे=आसनेऽदासीत्=ददौ । कर्त्री-सा, कर्म-चतुष्किकाद्वयम् । ५. सशर्करं यत् पयस्तद्वद्चार्वीगीः तया । ६. भुङ्क्ष्व त्वं, की० सबन्धुः=बन्धुसहितः, कर्म=भोजनम् । ७. रुषः=कोपस्य अदत्तप्रतिवचना । ८. अमुष्मिन्=श्रेष्ठिनि । की० भूयोऽपि भाषिते । की० अकृतप्रतिभाषणे । ९. निष्पन्दे=निश्चले वदनेक्षणे यस्य तत् । १०. यमगृहगतम् । ११. नामशेषत्वं, कोऽर्थः ? मृतत्वमिति ज्ञेयम् ।

For Private and Personal Use Only

क्षित्वा मध्येगृहममुं, गर्त्तायां गुप्तमेव हि। गतो देशान्तरं श्रेष्ठी,-ति प्रकटं क्रियते जने ॥ १४५ ॥
गीष्पतेरधिका धीस्ते, भ्रात्रेत्थमतिशंसिता[1]। पिधाय श्रेष्ठिनी द्वारं, गर्त्तायां चिक्षिपेऽथ तम् ॥१४६॥ त्रिभिर्विशेषकम् ॥
श्रेष्ठिनी भोजयामास, भ्रातरं सादरं ततः। स्वयं चाभुङ्क्त वक्ति स्म, भ्रातराकर्णयाधुना ॥ १४७ ॥
स्वप्नेऽत्र मयका रात्रि-शेषे पीयूषदीधितिः। पार्वणः[2] प्रविशन्नास्ये, दीप्यमानो निरैक्ष(क्ष्य)त ॥ १४८ ॥
तत्प्रभावादहं जाने, भावी पुत्रो ध्रुवं मम। तावद् व्यवहरन् हट्टे, तिष्ठ यावत्सुतो भवेत् ॥ १४९ ॥
प्रसद्य भ्रातरेषा मे, न कार्या निष्फलाऽर्थना। भ्रात्रोचे स्वसरुक्तं ते, विधास्यामि स्वमातृवत् ॥ १५० ॥
श्रेष्ठिनी स्वस्थचित्ताऽथ, विकचाम्बुजवक्त्रिका। शुभाकल्पा सखीगेहे, गत्वाऽगादीत्सखीं प्रति ॥ १५१ ॥
वर्द्धाप्यसे[3] मया यद्य, यौष्माकभगिनीपतेः। अपतीर्थगताः पोताः, श्रुता आसन् जनैः समैः ॥ १५२ ॥
वेलाकूलेऽधुना श्रेष्ठि,-पुण्यादेते समाययुः। श्रेष्ठी तत्संमुखं तेन, प्रमुदात्स्वयमीयिवान् ॥ १५३ ॥ युग्मम्।
एवमुत्थापयन्ती[4] सा, प्रवादं कालमत्यगात्। तद्भ्राता श्रेष्ठिवद् हट्टे, व्यवहारं सदादधत् ॥ १५४ ॥

---

१. भ्रात्रा शंसिता भग्नी, हे भग्नि! ते तव धीः=बुद्धिः गीष्पतेः=बृहस्पतेः सकाशात्। धीः=बुद्धिः की० अधिका। पश्चात् श्रेष्ठिनी द्वारं पिधाय तं मृतं गर्त्तायां चिक्षिपे। २. पार्वणः= पूर्णिमाचन्द्रः। ३. हे भग्नि! मया वर्द्धाप्यसे-अपतीर्थगता ये पोताः पूर्वं श्रुता-आसन्। कस्य? यौष्माकभग्नीपतेः। भवद्भिः कथं जनैः समस्तैः समयत यत्=यस्मात् ते वेलाकूले समायाता इत्यर्थः। ४. एवं उत्थापयन्ती विस्तारयन्ती सा प्रवादं, कोऽर्थः? वार्त्ता सा श्रेष्ठिनी कालं अतिचक्राम, इति ज्ञेयम्।



For Private and Personal Use Only

संपूर्णे समयेऽसूत, श्रेष्ठिनी तनयोत्तमम् । पूर्णिमेव सदा भानुं (चन्द्रं), जननेत्राभिनन्दिनम् ॥ १५५ ॥
तत्कालजातमात्रोऽपि, बाल इत्थमचीकथत् । त्वरितं मातुलागच्छ, ( सहर्ष एव ) मेऽन्तिकम् ॥ १५६ ॥
उद्यदाश्चर्यकल्लोल,--माल(ला)मानसनीरधिः । समीपस्था सखी गत्वा, न्यगदद्बालमातुलम् ॥ १५७ ॥
देहि वर्द्धापनां मे यत्, स्वसुस्ते तनयोऽजनि । वाग्मीव निगदन्नेष, त्वामाकारयतेऽञ्जसा ॥ १५८ ॥
ददौ वर्द्धापनां सोऽस्यै, चारुरोमाञ्चकञ्चुकः । प्रमोदद्विगुणीभूत,--शरीरः स्मेरलोचनः ॥ १५९ ॥
विलसद्विस्मयानन्द,--रत्नमानसमन्दिरः । धर्मसारस्ततः शीघ्र,–मागमद्भगिनीगृहम् ॥ १६० ॥
बाहुं विस्तार्य हस्तेन, वक्रिताङ्गुलिधूनिना । आयातं मातुलं वीक्ष्या,–ह्वयन्नूचे शिशुः स्वयम् ॥ १६१ ॥
आगच्छ मातुल ! क्षेम,–कुशलं स्वागतं च ते । दाक्षिण्यं स्वस्वसुर्भद्रं, नवमासान् त्वया कृतम् ॥ १६२ ॥
कृतकृत्यं द्रुतं कृत्वा, प्रहेता त्वामहं गृहे । हर्ष एव त्वयाधेयो, विधेया नाधृतिः पुनः ॥ १६३ ॥

---

१. उद्यच्च तदाश्चर्यं च, तदेव कल्लोलमाला यस्याम्, ईदृशी चित्तसमुद्ररूपा । २. विलसत् विस्मय आनन्दे(दः) एव रत्ने(त्नं) यत्र तद्विलसद्विस्मयानन्दं रत्नं, एवंविधं मानसमन्दिरं यस्य असौ० । ३. वक्रिताङ्गुलीन् धूनयन्ती(ति) इत्येवंशीला(लः) वक्रिताङ्गुलिधूनी (निः) तेन वक्रिताङ्गुलिधूनिना । ४. हे मातुल ! आगच्छ ते तव कुशलं वर्त्तते । ५. अहं प्रहेता=प्रेषयिष्यामि त्वां, किं कृत्वा ? कृत्वा, कर्म–त्वां, की० कृतकृत्यम् ।

पीयूषसारिणीपूर्ण,-कर्णयुग्मोदरः किल । नवशेवधिलाभाति,-रिक्तमुद्रिकचेक्षणः ॥ १६४ ॥
अगाधाश्चर्यपाथोधि,-निर्मग्न इह तस्थिवान् । यावत्तावद्बभाषेऽसौ, या(जा)मेयेन स्वमातुलः ॥ १६५ ॥ युग्मम् ॥
भो मातुलास्ति मातङ्ग,-पाटके स्थावरौकसः । विभागे दक्षिणे चेत्स्म (वेश्म), तत्रास्ति निष्ठ्य(निःस्व)गेहिनी ॥१६६॥
शूकरैर्बहुभिर्मुण्ड-शूकरीव स्तनन्धयैः । भोजनार्थिभिरुद्वर्ज्य,-माना साऽस्त्यतिदुर्विधा ॥ १६७ ॥
अतिरूक्षमतिस्वल्प,-मप्यश्नन्त्यास्तनन्धयाः । एतस्या अग्रतो भुक्त्वा, यान्ति किञ्चि(किं वि)दधात्वसौ ॥ १६८ ॥
भूयोऽपि जातगर्भाया,-मस्यमाज्यर्याग्यसौ पुनः ( ? ) । गवेषयिष्यतीत्यास्य,-मादायैतत्पतिर्ययौ ॥ १६९ ॥
अर्भैरग्रेतनैर्दुःखं, सहमानातिनारकम् । प्रसूते स्माधुना पुत्र,-मियं निष्ठ्यकुटुम्बिनी ॥ १७० ॥
चण्डालीयं मुखं भङ्क्त्वा,-ऽश्मनाऽर्भं मारयिष्यति । उप्यते यादृशं धान्यं, लूयते तादृगेव हि ॥ १७१ ॥
तद्गच्छ शीघ्रमेतस्यै, माऽमुं मारय बालकम् । पालयैवंमभिधाय, देहि त्वं द्रम्मपञ्चकम् ॥ १७२ ॥
धर्मसारोऽथ तद्गेहं, गतोऽपश्यत्तमर्भकम् । हन्तुमुत्क्षिप्तपाषाणां, चण्डालीं चण्डकोपिकाम् ॥ १७३ ॥
मोचयित्वाऽथ पाषाणं, करादूचे स तां प्रति । दुष्टे! मारयसे डिम्भं, किमेतमतिनिर्घृणे ! ॥ १७४ ॥

---

१. पीयूषसारिण्या पूर्णकर्णयुग्मस्य उदरो यस्यासौ, इत्यर्थः । २. या(जा)मेयेन=स्वसृतनयेन । ३. स्तनन्धयैः=पुत्रैः । ४. दुर्विधा अर्थदुःखिता । ५. अतिरूक्षमतिस्वल्पं एतस्या अश्नन्त्याः । तथा एतस्या अग्रतः स्तनन्धयाः भोजनं भुक्त्वा यान्ति किं विदधातु असौ वराकी चण्डाली । ६. अर्भैः=बालकैः । ७. एवं उक्त्वा । ८. एतस्यै देहि द्रम्मपञ्चकम् । ९. डिम्भं=बालकम् ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तयोचे मांसरक्ते मे, भुक्ते अग्रेतनार्भकैः । भोक्ता[1]ऽस्थीनि ममायं त,-न्मारयेऽहं छलादपि ॥ १७५ ॥
भाविन्यपि जन्मन्यस्य, मुखं लात्वा पतिर्ययौ । कर्त्तुं न सूतिकर्मापि, मम किञ्चन विद्यते[2] ॥ १७६ ॥
धर्मसारेण साऽवादि, गृहाण द्रम्मपञ्चकम् । आजगाम निजं धाम, वि[3]स्मयस्मेरमानसः ॥ १७७ ॥
समुद्यद्दशनज्योतिः,-पीयूषं पायव(य)न्निव । भूयोऽभाषत या(जा)मेयो, मातुलं प्रति साञ्जसम् ॥ १७८ ॥
वत्स ! पर्युषितं जेमन्, सदा दुःखी भविष्यसि । इति मा[4]तृवचस्तत्त्वं, ज्ञात(तु)मुत्कोऽभवद्भवान् ॥ १७९ ॥
भूयो भूयोऽपि पृष्टापि, माताऽवोचन्न किञ्चन । श्रुतसागरसूर्यन्ते, किन्तु त्वां प्रा[5]हिणोदियम् ॥ १८० ॥
च[6]तुर्ज्ञानीप्रियाकान्तै,-रपि त्वं मुनिपुङ्गवैः । यदन्ते प्रेष्यथास्तं मां, विजानीया जनङ्गमम् ॥ १८१ ॥
मद्वेश्मनि यदाऽऽगच्छद्, भवान् साधर्मिकोत्तमः । तदा सद्भावकल्पद्रु,-रुदैन्मम मनोगृहे ॥ १८२ ॥

---

१. भोक्ता कर्त्ता अयं बालः, कर्म--अस्थीनि, कस्य ? मम । २. सूतिकर्म कर्त्तुं मम किञ्चन, कोऽर्थः ? किञ्चिदपि न विद्यते । ३. विस्मयस्मेरमानसः, कोऽर्थः ? आश्चर्यमनाः । ४. अभवत्, कर्त्ता—भवान्=त्वं, की० उत्कः, कोऽर्थः उत्कण्ठितः । किं कर्त्तुं ? ज्ञातुं कर्म—मातृवचस्तत्त्वम् । ५. प्राहिणोत्=प्रेषयामास, कर्त्री—इयं माता । ६. चतुर्ज्ञानी, इत्यादि, कोऽर्थः ? विजानीयाः=जानीहि, कर्त्ता—त्वं, कर्म—तं मां किं० जनङ्गमं=स्थावरं—चण्डालं यदन्ते प्रेष्यथाः, कोऽर्थः ? प्रेषिता, कर्म्म—त्वं कर्त्तृभिः—मुनिपुङ्गवैः, की० चतुर्ज्ञान्येव प्रिया=भार्या तया कान्ताः, कोऽर्थः ? मनोहराः, तैः, क ? यदन्ते—यस्य चाण्डालस्य अन्ते=पार्श्वे यदन्ते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यदेवं[1] जैनधर्मेऽपि, प्राप्ते पञ्चापि नाक्षतान् । अर्होऽर्हत्सदने दातुं, संविभागं न साधुषु ॥ १८३ ॥
चिन्तितार्प्पणशक्तेऽपि, चिन्तारत्ने करस्थिते । निष्पुण्यस्येव तन्मे न, स्वोदरस्यापि पूरणम् ॥ १८४ ॥ युग्मम् ॥
ज्ञाततत्त्वोऽपि यन्नाहं, जिनं पूजयितुं लभे । तदाद्ये कवले मन्ये, मक्षिका पतिता मम ॥ १८५ ॥
चैत्ये साधौ च सत्क्षेत्रे, यद्धनं बीजमुप्यते[2] । तत्सिक्तं भावपीयूषै,-रनन्तं भवति ध्रुवम् ॥ १८६ ॥
इच्छतोऽनिच्छतो[3] वाऽपि, शुद्धवंशगृहेशितुः । भ्रातृपुत्रकलत्रादि,-मध्याद्यः कोऽपि यच्छति ॥ १८७ ॥
तेनापि मुनिचैत्यादौ, दत्तं स्यात्सफलं धनम् । न्यस्ता यथा तथाऽऽस्ये[4] हि, मिष्टं निर्माति शर्करा ॥१८८॥ युग्मम् ॥
कदलीफलखर्जूर,-द्राक्षापक्वान्नमुख्यकैः । प्रचुरैर्वस्तुभिः पूर्णे, वर्त्तमानोऽपि मन्दिरे[5] ॥ १८९ ॥
भोगान्तरायतो भोक्तुं, यथा न लभते नरः । तथाऽहं जैनधर्मेऽपि, स्थितो दातुं लभेन्न हि ॥ १९० ॥ युग्मम् ॥

---

१. यदा एवंविधे जैनधर्मे प्राप्तेऽपि अर्हत्-सदने पञ्चापि अक्षतान् नार्हः=न योग्यः साधुषु संविभागं दातुं नार्हः=न योग्यः । २. उप्यते=रोप्यते । ३. गृहिणी, की० शुद्धवंशगृहस्वामिनः । की० इच्छतः, की० अनिच्छतः ? तस्य सत्कभ्रातृपुत्रादिमध्यात् यः कोऽपि यच्छति पात्रे दानं तेनापि, कोऽर्थः ? भ्रातृपुत्रादिना दत्तं दानं सफलं स्यात्, इत्यर्थः । ४. आस्ये=वदने इत्यर्थः । ५. मन्दिरे पूर्णे वर्त्तमाने नरो न लभते ॥ ( श्लो. १८९-१९० युग्मम् )



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

[1]तद्धिग्धिग् मे कुलं पूर्व-कर्मदुर्वैरिणोऽङ्गजम् । येनार्हत्साधुदानादे,-र्वञ्च्ये चिन्तामणेरिव ॥ १९१ ॥
यद्वा पादं गले दास्ये, दुष्कर्मप्रतिपन्थिनः । [2]मम पुण्योदयो मित्र,-मधुना समुदैत्तमाम् ॥ १९२ ॥
मम गेहाङ्गणं कल्प-द्रुमः स्वयमवाच(त)रत् । [3]स्वर्गवी रम्भ(रम)माणा च, प्रविवेशातिहर्षतः ॥ १९३ ॥
नवाप्[4]युदघटन्ताशु, निधानानि ममौकसि । [5]समधर्मेदृगागाद्यत्, प्रेषितो मुनिपुङ्गवैः ॥ १९४ ॥ युग्मम् ॥
एतच्चित्ताम्बुजे हंसा,-विव सर्वज्ञसद्गुरू । खेल[6]तो निर्मलौ नित्यं, सद्गती (सङ्गतौ) चारुदर्शनौ ॥ १९५ ॥
अङ्गीकुर्वंश्च सम्यक्त्वं, श्राद्धो वक्ति गुरुं प्रति । धनधान्यादिभिर्युक्तो, मयाऽऽत्मा युष्मदर्पितः ॥ १९६ ॥
या काचित्क्रियते भक्ति,-स्तव साधर्मिकं प्रति । आराध्येते तया देव,-गुरू एव ध्रुवं बुधैः ॥ १९७ ॥
गालीकलहपैशून्य,-मत्सराद्यं विधीयते । समधर्मणि यत्तेना,-शातना देवसाधुषु ॥ १९८ ॥
तत्साधर्मिकवात्सल्यं, शल्यमान्तरविद्विषाम् । धर्मसारस्य निर्माय, कृतार्थं विदधे स्वकम् ॥ १९९ ॥
इदं दर्शनजीवा[7]तु,-रिदं दर्शनजीवितम् । इदं दर्शनकल्पद्रु(द्रुः), यद्दानं समधर्मणे ॥ २०० ॥

---

१. तत् मे कुलं, की० धिग् धिग्, की० अङ्गजं=पुत्रं, कस्य ? पूर्वदुष्कर्मवैरिणः, येन वञ्च्ये अहं कस्मात् ? अर्हत्साधुदानादेः, की० चिन्तामणेरिव इति ज्ञेयम् । २. मम पुण्योदयः की० मित्रं समुदैत्तमां, कोऽर्थः ? उदयं प्राप्तः । ३. स्वर्गवी=कामधेनुः । ४. उदघटन्त, कोऽर्थः ? प्रकटानि बभूवुः नव निधानानि । ५. समधर्मा ईदृक्त्वं यत् आगतः इत्यर्थः । ६. खेलतः, कर्त्तारौ-सर्वज्ञगुरू, की० हंसौ, की० चारुदर्शनौ, की० सद्गती, क ? एतच्चित्ताम्बुजे । ७. जीवातुः-कोऽर्थः ? जीवनौषधम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्यादिभावनाचिन्ता-मणिं हृदि दधत्तमः । भोज्यं तेऽदापयं चारु, कृपणाट्टे प्रमोदतः ॥ २०१ ॥
तव मातुलवात्सल्यं, तथाऽहं विदधे तदा । यथा निष्क्योऽपि शुद्धेऽत्र, चतुष्कोट्यधिपोऽभवम् ॥ २०२ ॥
द्रम्मपञ्चकदानेन, चण्डालीतनयोऽधुना । त्वया यो रक्षितो भग्न्या,-धनसारो वरोऽसकौ ॥ २०३ ॥
राजचौराग्निपानीय,-देवदैत्यादिकैरपि । कथञ्चिदपि यच्छक्यं, नापकर्तुं मनागपि ॥ २०४ ॥
अपूर्वराक्षसी लक्ष्मीः, पुण्यं तदपि हेलया । पश्यतोहरवत्सर्वं, हरते पश्यतामपि ॥ २०५ ॥ युग्मम् ॥
भारमेव बलीवर्दो, बालीवर्दिकसंगतः । परीभावं पराप्नोति, निष्पुण्यश्च पदे पदे ॥ २०६ ॥
सरोऽपि मानसं शुष्य,-त्यवकेशी सुरद्रुमः । बष्का कामदुघाऽपि स्या,-दपुण्यस्यान्तिके यतः ॥ २०७ ॥
नवभोज्यादिभोगेन, निघ्नन् पुण्यं परार्जितम् । नवं चानर्जयन् धर्मे, प्रमाद्यंस्त्वं च मातुल ! ॥ २०८ ॥
जनन्या भाष्यसे धर्मे, बोधाय प्रतिवासरम् । जेमन् पर्युषितं नित्यं, वत्स ! दुःखी भविष्यसि ॥ २०९ ॥ युग्मम् ॥
भवदुर्वासभा(भो)गीन्द्र,-विषं स्फेटयितुं ततः । श्रुतसागरसूरीशा,-न्तिके सन्मन्त्रशेवधेः ॥ २१० ॥

१. ते तव (तुभ्यं)भोज्यं चारु=प्रधानं अदापयं, क ? कृपणहट्टे । २. न शक्यं कर्म-यत् पुण्यं, किं कर्तुं-हर्तुं कैः ? राजचौरादिभिः, तत्पुण्यं लक्ष्मी राक्षसी, कर्त्री चौरवत् हरते, इति ज्ञेयम् । ३. पराप्नोति कर्त्ता-नरः, की० निष्पुण्यः, कर्म-पराभवं, यथा प्राप्नोति, कर्त्ता-बलीवर्दः, की० बालदीयुक्तः, कर्म-भारम् । ४. स्यात्, कर्त्ता-सुरद्रुः, की० अवकेशी=विफलः । तथा कामधेनुः, की० बष्का विशूका दुग्धरहिता । ५. प्रमाद्यन्, कोऽर्थः ? प्रमादं कुर्वन् हे मातुल ! । ६. हे मातुल ! जनन्या सूरेः पार्श्वे संप्रेषितः । त्वम् ।



For Private and Personal Use Only

वज्रदुर्भेदनिर्बन्ध,-पृष्टयाऽन्येद्युरम्बया । एकान्तहितवाञ्छिन्या, भवान् संप्रैषि मातुल ! ॥ २११ ॥ युग्मम् ॥
धनसारस्य दृष्टान्तं, वैराग्याम्बुपयोमुचम् । विना भोगेषु लै(लु)ब्धोऽयं, सदा न प्रतिभोत्स्यते ॥ २१२ ॥
इत्यत्यन्ताद्भुतज्ञान,-प्रदीपैरपि सूरिभिः । मातङ्गस्यापि मे पार्श्वे, प्रहितोऽसि सदाशय ! ॥ २१३ ॥ युग्मम् ॥
भुञ्जानोऽसि सदा भोगा,-नकुर्वन् धर्ममार्हतम् । लौकिकीमपि नो नीति,-मिमां जानासि मातुल ! ॥ २१४ ॥
इदमेव हि पाण्डित्य,-मियमेव कुलीनता । अयमेव परो धर्म्म, आयादल्पतरो व्ययः ॥ २१५ ॥
पूर्वपुण्यार्जितत्वेन, भोज्यं पर्युषितं सदा । तात्कालिकमपीहाम्बा, तँत्र वक्ति सुबान्धव ! ॥ २१६ ॥
संसाराम्भोनिधौ धर्म,-चिन्तामाणिक्यलब्धये । जीवानां मानुषं जन्म, परमाङ्गमुदाहृतम् ॥ २१७ ॥
यद्देवा विषयासक्ता, नारका नित्यदुःखिनः । तिर्यञ्चो निर्विवेकास्त,-द्धर्मयोग्या नराः परम् ॥ २१८ ॥
बीजं कल्याणकल्पद्रो,-र्भवावश्यायभास्करः । विघ्नौघाहिविहङ्गेशः, सिद्धिश्रीसरसीरुहम् ॥ २१९ ॥
भवाम्भोधिमहापोतो, जिननाथोदितो वृषः । पितृमातृसुहृत्स्वामि,-मुख्येभ्योऽपि विशेष्यते ॥ २२० ॥ युग्मम् ॥
अमी यन्न चिरायुष्का, न च जन्मान्तरानुगाः । न महोदयकर्त्तारो, नाविसंवादिनः सदा ॥ २२१ ॥

१. धनसारदृष्टान्तं विना । २. वैराग्य एव अम्बुनि=जले पयोमुचं=जलदम् । ३. अयं ल(लु)ब्धः प्रतिबोधभावं न गमिष्यति । ४. तव अम्बा=जननी इह=भोजने हे सुबान्धव ! वक्ति । ५. विशेष्यते, कोऽर्थः ? विशिष्टो भवति, कर्त्ता-वृषः=धर्मः । ६. अमी मातृपुत्रादयः । की० न अविसंवादिनः । कोऽर्थः ? विनश्वराः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अविसंवादिनं नित्यं, जन्मान्तरसहायन(क)म् । महोदयनि(वि)धातारं, तत्सेवध्वममुं बुधाः ! ॥ २२२ ॥
वाटिका चम्पकेनेव, सरोवरमिवाम्बुना । पद्मया विश्रुता यद्व,-त्सेना सुस्वामिना यथा ॥ २२३ ॥
प्रासादो देवबिम्बेन, यथा वृष्ट्येव वारिदः । जीवेनेव तनुर्भाति, धर्मेण मनुजस्तथा ॥ २२४ ॥ युग्मम् ॥
प्राप्तराज्यरमो नूनं, भिक्षायै स यियासति । हस्तिमल्लं समारूढो,-ऽप्यारुरुक्षति रासभम् ॥ २२५ ॥
स्वाधीनामृतकुम्भोऽपि, क्षारवारि पिपासति । संप्राप्तजैनधर्म्मोऽपि भोगेच्छा विदधाति यः ॥ २२६ ॥ युग्मम् ॥
निष्ठिताशेषगेहार्थो, योऽत्र धर्म्मं चिकीर्षति । नखशुक्त्याम्बु सोऽम्भोधे,-र्मित्वा निर्मातुं वाञ्छितम् ॥ २२७ ॥
धर्मश्च द्विविधः साधु-श्राद्धभेदेन भाषितः । क्षान्त्याद्यो दशधा तत्रा,-द्यिमः संमत उत्तमः ॥ २२८ ॥
संपूर्णः संयमः प्रौढ,-विपत्कैरविणीहिमम् । सद्य आकर्षणोपायो,-ऽपवर्गस्वर्गसंपदाम् ॥ २२९ ॥
प्रभूतान्यपि पापानि, द्रुतं नश्यन्ति संयमात् । गरुडस्येव वातेन, भुजङ्गा भीषणा अपि ॥ २३० ॥
इत्थं संयममत्तवारणशिरो-ऽध्यारुह्य योऽष्टादश,-श्रीशीलाङ्गसहस्रवीरतिलकान्वीतोऽष्टकर्मद्विषः ।

---

१. पद्मया=लक्ष्या । २. गन्तुमिच्छति भिक्षार्थम् । ३. निर्मातु=करोतु, कर्त्ता-स नरः, कर्म=वाञ्छितं=मनोवाञ्छितं, किं कृत्वा ? मित्वा, कर्म-अम्बु=जलं, कस्य ? अम्भोधेः, कया ? नखशुक्त्या इत्यर्थः । ४. विपदेव कुमुदिनी, तत्र महाहिमम् । ५. तस्य शिवे उत्सवः स्यात् । पराभवियनरः, कर्म-अष्टकर्मद्विषः । की० निर्वाणमार्गविरोधिनः, अध्यारुह्य कर्म-संयमगजशिरः इत्यर्थः ।



For Private and Personal Use Only

निर्वाणाध्वनि रोधिनो विजयते तस्याशु निस्संशयं । संपद्येत सदा मुखे, शिवपुरे राज्याभिषेकोत्सवः ॥ २३१ ॥
[1]तदहर्जस्य बालस्या,-श्रुतपूर्वी वचोभरम् । यथामयस्य तथा श्रुत्वा, धर्मसारो [3]विसिष्मिये ॥ २३२ ॥
वीक्षितेवेन्द्रजालस्य, धर्मसारस्तदाऽद्भुतम् । वच एतद्वृथा सत्यं, वेति संशयमासदत् ॥ २३३ ॥
चेत्कोऽप्यतीन्द्रियज्ञानी, भास्वानिह(निव) तमोहरः । आगच्छेत्तर्हि मे सद्यः, समुदैति सुवासरः ॥ २३४ ॥
एवं दध्यावसौ याव,-त्तावत्सूरिः स एव हि । आययाविह सौभाग्य,-पुरे विश्वैकभाग्यवत् ॥२३५॥ त्रिभिर्विशेषकम् ॥
श्रुतसागरसूरीन्द्रं, स्वभाग्याम्भोजभास्करम् । श्रुत्वायातं मुदासारो, धर्मसारोऽन्तिकेऽगमत् ॥ २३६ ॥
सन्महःसूरिराजांघ्रि,-देवयोर्नखकान्तिभिः । कुङ्कुमैस्तिलकं भाले, कृत्वा सोऽथ व्यजिज्ञपत् ॥ २३७ ॥
तत्कालजातमात्रेण, भागिनेयेन मेऽधुना । उक्तो वृत्तान्त ईदक्ष, एष सत्यो वृथाऽथवा ॥ २३८ ॥
मुनिराजो जगादाथ, धर्मसार धियांवर ! । चलेन्मेरुरपि स्थाना,-त्तदुक्तं न पुनः क्वचित् ॥ २३९ ॥
व्याहरद्धर्मसारोऽथ, भूयो भूयिष्ठविस्मयः । तदहर्जशिशोरेवं, वचःशक्तिरभूत्कथम् ॥ २४० ॥

---

१. प्रारम्भे । २. तस्मिन् अह्नि जातस्य । ३. विस्मयपरो बभूव । ४. वीक्षितः(ता)=अवलोकितः(अवलोकयिता), कः ? कर्त्ता-धर्मसारः, कर्म-अद्भुतं=आश्चर्यं, कस्य इव=इन्द्रजालस्य इव । तदनन्तरं आसदत् धर्मसारः कर्म-संशयं, कथं ? एतद्वचः वृथा सत्यं वा । ५. अतीन्द्रियज्ञानी केवलज्ञानी । ६. सन्महश्च(हसश्च) ते सूरिराजानश्च तेषां अंह्री ते एव देवौ तयोः । ७. अद्यतनजातबालस्य ।

३

अधः कुर्वन् सुधां सूरि,–राजो भूयोऽप्यभाषत । भोज्यं भग्नीपतेरट्टे, स्थावरोऽदापयद्रुयदा ॥ २४१ ॥
दुर्वारवैरिविक्षिप्त,–क्षुरिकाग्रप्रहारवत् । तदैव सदनं प्राप्तो, निष्ठ्यः शूलेन बाधितः ॥ २४२ ॥ युग्मम् ॥
संक्षुब्धः [१]स्थावरः शूला,–दायुर्वृक्षकुठारतः । सस्मार चेटकं सिद्धं, बन्धुवत्प्रीतिसाधनम् ॥ २४३ ॥
स्मृतमात्रस्ततः प्राप्त,–श्चेटकोऽवोचतास्मि किम् । भवता संस्मृतो भद्र ! प्रसद्य प्रतिपादय ॥ २४४ ॥
स्थावरो व्याहरच्छूल,–मिदं प्राणहरं किमु । [२]भाविनो वाऽवधेर्ब्रूहि, सोऽवग् भाव्येव सत्वरम् ॥ २४५ ॥
ऊचे निष्ठ्यः[३] पुनः कुत्रो–त्पत्स्यो(त्स्ये)ऽयं मुनिपुङ्गवैः । पर्युषिताशनाद्यर्थं, प्रष्टुं किं प्रैषि मेऽन्तिके ॥ २४६ ॥
चेटकोऽवग् भवान् भावी, धनसारप्रियाङ्गजः । सधर्मभक्तिसंसिद्ध,–धर्मकाञ्चनपूरुषः ॥ २४७ ॥
एवमेव [४]प्रबोधोऽस्य, भवितेति मुनीश्वरैः । प्रेषितोऽसौ तवा[५]भ्यर्णे, तुष्टत्या(तुष्ट आ)गाच्च सत्वरम् ॥ २४८ ॥
निष्ठ्योऽवादीदहं पु[६]ण्य,–दुर्विधैकशिरोमणिः । प्रतिकूलोऽधुना दैवः, सरलो वासरो न मे ॥ २४९ ॥

---

१. सस्मार, कर्त्ता–स्थावरः, कर्म–चेटकं, की० स्थावरः ? संक्षुब्धः, कस्मात् ? आयुर्वृक्षकुठारतः । २. किमु भावि भविष्यति कर्तृ–इदं शूलं, की० प्राणहरं, वा–अथवा नो भावि, इदं शूलं, की० प्राणहरं इति संबन्धो ब्रूहि । कस्मात् ? अवधेः, स व्यन्तरः प्राह–भावि इदं शूलं, की० प्राणहरं कथं ? शीघ्रम् । ३. पुनः निष्ठ्यः=चाण्डाल ऊचे–कुत्र उत्पत्स्ये तथा अयं साधर्मिकः सूरिभिः प्रैषि मम पार्श्वे प्रष्टुं पर्युषिताशनाद्यर्थं किं ? इति प्रच्छाद्वयम् । ४. भविता=भविष्यति प्रतिबोधः अस्य धर्मसारस्य । ५. तव पार्श्वे । ६. पुण्यदारिद्रेषु मध्ये अद्वितीयशिरोमणिः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समधर्मेदृशः सूरि-प्रेषितो यन्ममाङ्गणम् । प्राप्तोऽपि व्यर्थिताशः सन्, पश्चाद् यास्यति मन्दिरम् ॥ २५० ॥
बुभुक्षार्त्तस्य मे नूनं, तन्मुखात्कवलो गतः । पिपासतश्च पीयूष,-कच्चोलः करतो हृतः ॥ २५१ ॥ युग्मम् ॥
एवं निन्द्य (निश्च्यं) विषीदन्त(न्तं), गतशेवधिवद् भृशम् । चेटकोऽवग् विषीदेः किं, मयि कल्पतरौ सति ॥ २५२॥
जातमात्रस्य ते वक्त्रे,-ऽवतीर्यापि भवान्तरे । प्रबोधं धर्मसारस्य, विधास्येऽहमसंशयम् ॥ २५३ ॥
पित्रेव चेटकेनैव,-मौश्वस्तीकृतमानसः । स्थावरः कीर्त्तिशेषोऽभू,-द्धर्मध्यानपरायणः ॥ २५४ ॥
अधुनाऽवसरं ज्ञात्वा, चेटकः समवातरत् । उत्तमाः स्वं प्रतिज्ञातं, मन्यन्ते जीवितं यतः ॥ २५५ ॥
ऐवमाकर्ण्य संवेग,-सुधाम्भोनिधिमागतः । पुण्यचिन्तामणिप्राप्ति,-नितान्तोत्पन्नकामनः ॥ २५६ ॥
श्रुतसागरसूरीन्द्र,-सेवितं प्रतिवासरम् । धर्मसारो धर्मसार,-श्चारित्रं समुपाददे ॥ २५७ ॥ युग्मम् ॥
श्रुतसागरसूरीन्द्रा,--च्छ्रुतरत्नैकनीरधेः । श्रुतरत्नानि संगृह्णन्, विजह्रे स पुरान्तरम् ॥ २५८ ॥
लब्धराज्यवदानन्द,--पूर्णे जातेऽङ्गजन्मनि । उत्सवं कारयामास, धनसारस्य गेहिनी ॥ २५९ ॥

---

१. ईदृशः धर्मसारः समधर्मा । २. किं विषादं कुर्याः । ३. आ=समन्तात् श्वस्तीकृतमानस इत्यर्थः । ४. अङ्गीकृतम् । ५. एवं आकर्ण्य चाण्डालः, की० आगतः कर्म-संवेगसुधाम्भोनिधिं की० चाण्डालः ? पुण्यमेव चिन्तामणिः तस्य प्राप्तिः, तया नितान्तं उत्पन्नकामनः, कोऽर्थः ? संपूर्णमनोरथः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुण्यसारं(र)तयैषोऽत्र, चतुष्कोटिधने गृहे । आयात इति नामाम्बा, पुण्यसार इति व्यधात् ॥ २६० ॥
[1]कामकाम्याङ्गरोचिस्को, विश्व[2]कैरवबोधतः । [3]कं कं नानन्दयत्येष, [4]पार्वणामृतधामवत् ॥ २६१ ॥
यदङ्गाप(प्र)दलेनैव, पीयूषं विदधे विधिः । चुम्बन्त्या अमुमम्बाया, ह्य[5]स्मात्स्यादधिको रसः ॥ २६२ ॥
सर्वलक्षणसंपूर्ण,--मेतदङ्गनिकेतनम् । रम्यं वीक्ष्येव विश्वस्थ,--मपि सौभाग्यमा[6]गमत्(मागता) ॥ २६३ ॥
[7]अन्यथा कथमे[8]तस्मि,--न्नीश्वरा अप्यसंस्तुताः । अधिकं स्वप्रियापत्या,--दपि स्निह्यन्ति साञ्जसम् ॥ युग्मम् ॥
अपक्केनैष कर्पूर,--पूरेणैव विनिर्मितः । अन्यथा कथमाश्लिष्टः, शी[9]तलीकुरुते दृशः ॥ २६५ ॥
[10]मातुः स्तन्यैरसौ सौध,--द्रव्यवत्कल्पपादपः । रम्यीभवद्वपुःशाखः, पुण्यसारोऽवृधत्क्रमात् ॥ २६६ ॥
कलाचार्यात्स जग्राह, सकलाः स्वोचिताः कलाः । वारांनिधि........यान्ती, वार्षिकी वार्द्धिवल्लभाः ॥ २६७ ॥
कामिनीदृष्टसारङ्ग,--वागुराकान्तिभास्करः । कामदन्तावलालानं, यौवनं प्राप स क्रमात् ॥ २६८ ॥
तरुणीभिः कटाक्षौघैः, शितैर्बाणैः समन्ततः । सर्वाङ्गं हन्यमानोऽपि, स सदा मोदतेतमाम् ॥ २६९ ॥
[11]अपहस्तितकामाङ्ग,--मिमं संवीक्ष्य [12]संस्पृहे । रतिप्रीती विरक्ते नु, निजं ति[13]र्यक्षतः पतिम् ॥ २७० ॥

---

१. कामं=अतिशयेन काम्या मनोहरा अङ्गरोचिर्यस्य असौ० । २. कैरवं=कमलम् । ३. कं=जनम् । ४. पूर्णिमाचन्द्रवत् । ५. पीयूषात् । ६. सा माता । ७. अन्यथा=सौभाग्यं विना । ८. बालके । ९. स्नेहं कुर्वन्ति(शीताः करोति) । १०. यथाऽसौ द्रव्यैः कृत्वा कल्पपादपः वृद्धिं गच्छति तथाऽसौ अवृधत् । ११. तिरस्कृतरमणाङ्गम् । १२. साभिलाषे । १३. त्यक्तुं वाञ्छतः ।



For Private and Personal Use Only

मा त्याक्षुरिमका नोऽमुं, विलोक्येति भयादिव । विधेर्व्यधापयद्व्योमा–न्तरेन्द्रो रक्षितुं प्रियाः ॥ २७१ ॥
गौरीं गोपयितुं शम्भु,–रगात्कैलासमूर्धनि । नागीर्नागपतिः पातुं, ययौ लात्वा रसातले ॥ २७२ ॥ युग्मम् ॥
दासीभूतशचीशोभां, निर्गौरि(निर्गौर)त्वितगौरिकाम् । लावण्यापास्तनिःशेष–नागिकां काञ्चनांशुकाम् ॥ २७३ ॥
दाक्षिण्यशीलशालीन्या(शालिस्वा)-भरणामिभ्यपुत्रिकाम् । हृष्यन्तीं(न्ती) पुण्यसारेण, जननी पर्यणीनयत्।२७४।युग्मम्।
भुञ्जानश्चारु भोज्यानि, भोगभङ्गीव(भङ्गीं च) नूतनाम् । पुण्यसारो विवेदास्तो,–दयौ न हि दिनेशितुः ॥ २७५ ॥
इतश्च धर्मसारेणै,–कादशाङ्गीनितम्बिनी । निन्ये स्ववश्यतां पाठा,–द्यभ्यासात्कार्मणादिव ॥ २७६ ॥
शरीरे खलवत्सृष्ट, उपकारोऽफलोऽखिलः । इति तच्छोचयंस्तीव्रं, तपो निर्मात्यसौ सदा ॥ २७७ ॥
तपोऽग्निना तप्यमानात्, सुवर्णादात्मनस्ततः । निर्ययाववधिज्ञान,–दीधितिर्ध्वान्तघातिनी ॥ २७८ ॥
यामेयचरितं ज्ञातु,–मवधिबन्ध(बन्धु)वत्ततः । प्रहितो धर्मसारेण, ययौ शीघ्रं तदन्तिके ॥ २७९ ॥
आगत्य धर्मसाराय, तेनोचे तव यामिजः । कितवो द्यूतवत्काम,–मेव शिश्राय सर्वदा ॥ २८० ॥
ममेदृग्व्रतकल्पद्रु,–लाभहेतुरसाविति । इदानीमुपकृत्यास्मै, भवामि निर्ऋणोऽस्म्यपि ॥ २८१ ॥
एवं ध्यात्वा धर्मसारो, धर्मरत्नैकरोहणः । हृतस्वःपुरसौभाग्यं, सौभाग्यपुरमाययौ ॥ २८२ ॥ युग्मम् ॥

---

१. भूमिव्योमान्तरं व्यधापयत् । २. दुर्जनवन्निर्मितः । ३. अवधिज्ञानदीप्तिरुत्पन्ना । ४. तमोनिर्नाशिनी । ५. यामेय, भाणेजा ।
६. निर्ऋणो=ऋणवर्जितः अस्म्यपि=अहमपि ।

गत्वा नत्वा मुनिं पौरा, योजिताञ्जलिकुड्मलाः । उपाविक्षन् पुरः पातु,-मिव धर्म्मसुधारसम् ॥ २८३ ॥
सुरद्रुवद्धर्मसारं, श्रुत्वाऽऽयातमुपेत्य च । नत्वाम्बा पुण्यसारेण, सार्द्धमेवं व्यजिज्ञपत् ॥ २८४ ॥
प्रमादद्विषतो गेहे, वर्त्तमानः सदाऽपि हि । बान्धवस्यैष धर्म्मस्य, न संमुखमपीक्षते ॥ २८५ ॥
यथा धर्मरतोऽसौ स्यात्, सदा स्वामिंस्तथा कुरु। भीष्मा अप्यहयो मन्त्रैः, क्रियन्ते निर्विषा न किम्?॥२८६॥ युग्मम्॥
धर्मसारोऽवदद् भद्र!, पुण्यसारात्र संस्मृ(सृ)तौ । वार्द्धौ रत्नमिव भ्रष्टुं(ष्टं), दुर्लभं मानुषं जनुः ॥ २८७ ॥
जैनः सुदुर्लभो धर्मो, विभवो गतपुण्यवत् । सामग्री दुर्लभा सिद्धि,-रिव साधुसधर्मणोः ॥ २८८ ॥
त्रयाणामेष संयोग,-स्त्रिवेणीसङ्गमाधिकः । संप्राप्तः सफलीकार्यः, क्षेत्रवद्वारिदैर्बुधैः ॥ २८९ ॥
कामिनी विभवः काम्या, विषया यौवनोदयः । पूर्वजन्मकृतस्यैते, सुकृतस्यैव किङ्कराः ॥ २९० ॥
मुहूर्त्तघटिकायाम,-दिनपक्षादिका घनाः । उद्दण्डयमदण्डस्य, प्रहारा अतिनिर्दयाः ॥ २९१ ॥
देहिनां यत्र देहेषु, निपतन्ति समन्ततः । तत्राशा कीदृशी वस्तुं, क्रियते भववेश्मनि ॥ २९२ ॥ युग्मम् ॥
यत्र शक्तः कृतान्तोऽपि, न प्रहर्तुं कदाचन । तन्महोदयसद्माप्तुं, भजार्हद्धर्म(र्मं) बान्धव ! ॥ २९३ ॥
किञ्च त्वं धनसारस्या,--पुण्यस्य स्वपितुर्गतिम् । शृणु दुर्विधचण्डाली,--तनयोऽभूत्पिता तव ॥ २९४ ॥
चेटकाधिष्ठितेनैष, द्रम्मपञ्चकदापनात् । भञ्जन्त्या वदनं मातु,--रश्मना रक्षितस्त्वया ॥ २९५ ॥

१. संसारे ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जाते तत्र क्षयं निश्च्य,--कुटुम्बं क्रमतो ययौ । यत्रागच्छति निष्पुण्य,--स्तत्र किं कुशलं भवेत् ? ॥ २९६ ॥
कुलक्षयकरं पापं, धिक् त्वामेवं जनैः समैः । आराभिरिव तीक्ष्णाभि,--र्वाणीभिस्तुदितोऽसकौ ॥ २९७ ॥
चटितुं स्वगृहद्वारे, नास्यादात्कोऽपि जातुचित् । दशोरग्रादपसरे,--त्येवमेवाखिलोऽवदत् ॥ २९८ ॥
चामुण्डावत्क्षुधार्त्तोऽयं, रौद्रो नो भक्षयिष्यति । लज्जातुङ्गत्वधीतोजा(धीनोजो),–माना नेशुरतो भिया ॥ २९९ ॥
यस्याग्रेऽसाववग् देव !, देह्यादेशं प्रसद्य मे । किं नः श्रुती दहस्येदं, सोऽप्यवादीत्पुरोऽस्य तु ॥ ३०० ॥
लात्वा दुःखं मम या।ही,–त्युक्तेऽप्येषोऽब्रवीदिदम् । जीव देवेति दुष्पूरं, नोदरं किं विगोपयेत् ? ॥ ३०१ ॥
गूथमूत्रादिकोत्सर्ग,--प्रमुखान्यनुचितान्यपि । विदधानोऽपि कर्माणि, नाघ्राणोऽशेष्ट जात्वसौ ॥ ३०२ ॥
श्रेष्ठिनो धनदत्तस्या,–ऽत्र(त्रैव)संसदि तस्थुषः । अग्रे लात्वाऽङ्गुलीर्दम्भ,--रूचे कर्मकरी कुरु ॥ ३०३ ॥
धनदत्तेन दाक्षिण्या,–दङ्गीकृत्यास्य याचनाम् । प्रियामूचेऽसकौ भोज्यो,–ऽमुष्मात्कार्यं स्वकर्म च ॥ ३०४ ॥
स्वकर्म कारयित्वा सा,–ऽहोरात्रं द्रवरूपिकाम् । यवघृष्टिं ददात्यस्मै, नान्यथा पूर्वनिर्मितम् ॥ ३०५ ॥
इन्धनान्यदा(नान्यन्यदाऽऽ)नेतुं, श्रेष्ठिन्या प्रहितोऽसकौ । मध्येऽरण्यं परिभ्रम्य, मध्याह्ने तान्युपानयत् ॥ ३०६ ॥
कालरात्रिरिव क्रुद्धा, भृकुटीभीषणानना । श्रेष्ठिनी निष्कृपाऽवादी,–त्तं निष्पुण्यशिरोमणिम् ॥ ३०७ ॥
तावानपि त्वयाऽऽनीतो, न हि काष्ठभरोऽसकौ । यावता खादितुं तेऽन्नं, पच्यतेऽलसशेखर ! ॥ ३०८ ॥
धार्म्मिक(साधर्मिकः) त्वमस्माकं, कुलवृद्धोऽथवा किमु ? । उत्तमर्णोऽथवाऽऽसीनो, यच्छयानश्च पोष्यसे ॥३०९॥

For Private and Personal Use Only

भूयो दारूणि भूयांसि, त्वमानेतुं वने व्रज । अन्यथा तव भङ्क्ष्यामि, पादौ दास्ये न भोजनम् ॥ ३१० ॥
पादनखंपचे पांशौ(सौ), ललाटन्तपभास्करे । श्रेष्ठिन्या तर्जितः सोऽथा,-ऽनुपानत्को वनेऽगमत् ॥ ३११ ॥
क्षुत्तृषार्त्तः श्रवद्धाष्पो, दुःखसंग्रस्तमानसः । स दध्यौ हृदि हा ! भृत्य,-भवोऽयं नरकोपमः ॥ ३१२ ॥
उपर्युपरि दुःखानि, निपतन्ति ममोपरि । दैव ! मे जीवितं हृत्वा, शीघ्रं मां सुखिनी(नं) कुरु ॥ ३१३ ॥
इत्येवं चिन्तयन्नेवं(व), छित्त्वा काष्ठभरं गुरुम् । धृत्वा मूर्ध्नि नमद्ग्रीव,-स्तुर्ययामेऽविशत्पुरम् ॥ ३१४ ॥
पीडोपक्रमितायुष्क,-स्तत्क्षणं नरकं ययौ । अत्रामुत्रापि निष्पुण्या, न लभन्ते सुखं क्वचित् ॥ ३१५ ॥ युग्मम् ॥
त्वत्पिता धनसारोऽत्र, चतुष्कोट्यधिपोऽप्ययम् । ईदृग्विडम्बनापात्रं, प्रमादद्विषता दधे ॥ ३१६ ॥
पुण्यसार ! निजमपि, चरितं शृणु किञ्चन । आसीस्त्वं स्थावरो निष्ठ्यो,-दुर्विधः सिद्धचेटकः ॥ ३१७ ॥
द्वारचिञ्चंमि जं जीर्ण,-शीर्णतृणकुटीरकम् । मषीवर्णां प्रियां च स्वां, पश्यातिस्फटितांशुक(का)म् ॥ ३१८ ॥
सधर्मवत्सलत्वेन, त्वयैकं मम भोजनम् । दापितं तेन केनापि, भावमन्त्रेण संस्कृतम् ॥ ३१९ ॥
चतुर्द्रविणकोटित्व,-रूपतामभजद् यथा । कियद्वा(द्वाऽपि) ह्यदो विश्व,-रमाणामपि कार्मणम् ॥ ३२० ॥ युग्मम् ॥
कामं कामाधिकं रूपं, प्रार्थ्यमप्यमृताशिभिः । सुमनःकामिनीकाम्य,-लावण्या च नितम्बिनी ॥ ३२१ ॥
विभवो विगतस्पर्द्धं,धनदश्चामूनि जज्ञिरे । श्रीसाधर्म्मिकवात्सल्य,-कल्पद्रुमफलानि ते ॥ ३२२ ॥ युग्मम् ॥
पुण्यसारो धर्मसारा,-द्धर्म्मसारमहामुनेः । संशृण्वन् स्वं भवं पूर्व,-मेवं मूर्च्छामुपागमत् ॥ ३२३ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हृदि ध्रसकिता माता, सद्यः श्यामीकृतानना । अकस्मात्किमभूद्वत्स !, यन्मूर्च्छा भवतोऽभवत् ॥ ३२४ ॥
ऊचे पुत्रोऽधुना मात,-रभूज्जातिस्मृतिर्मम । निजं साधूदितं पूर्वं, साक्षाद्वीक्षे तथा भवम् ॥ ३२५ ॥
धर्मसारं ततोऽवादीत्, पुण्यसारः प्रभो ! मम । भर्व(व)सर्वविषं दीक्षा,-सुधादानात्तिरस्कुरु ॥ ३२६ ॥
मुनिरूचेऽथ भो भद्रे,-दृशस्तेऽपि मनोरथः । विश्वविश्वत्रयीरामा,-कृष्टिकार्मणसंनिभः ॥ ३२७ ॥
श्रीसाधर्म्मिकवात्सल्या,-र्जितं द्वादशवार्षिकम् । कर्म भोगफलं तेऽस्ति, तेन नाद्यापि योग्यता ॥ ३२८ ॥
दानशीलतपोभावान्, हितानोजस्विनो भवान् । भज येन प्रमादारि,-र्न प्रहर्त्तुं प्रभुर्भवेत् ॥ ३२९ ॥
खेलद्वैराग्यकल्लोल,-मालामानससागराः । ॥ ३३० ॥
धर्मसारोऽपि सद्धर्म्म,-देशनाज्योत्स्नया नरान् । एवमाह्लाद्य शीतांशु,-वद्विजह्रेऽन्यतस्ततः ॥ ३३१ ॥
पुण्यसारो दशक्षेत्र्यां, धनबीजमहर्निशम् । भावे वर्षति पर्जन्ये,-ऽनन्तं कर्तुं निचिक्षिपे ॥ ३३२ ॥
जयन्तसोदरं पुत्र,-त्रयमस्य क्रमादभूत् । पुण्यानुबन्ध(न्धि)पुण्यं हि, चिन्तामणिसहोदरम् ॥ ३३३ ॥
पुनर्द्वादशवार्ष्य(वर्षा)न्ते, केवलज्ञानभासुरः । धर्मसारमुनीशानः, सौभाग्यपुरमागमत् ॥ ३३४ ॥
चतुर्द्धा सङ्घवात्सल्यं, विधाय विधिना मुनेः । सिद्ध्याकर्षणमन्त्रं तु, पुण्यसारो व्रतं ललौ ॥ ३३५ ॥
अष्टावप्येष कर्माणि, दुष्टानि चरटानि च(निव) । तपसा चन्द्रहासेन, शितेनाहत्य हेलया ॥ ३३६ ॥
पञ्चानन्तकमाणिक्य,-पूर्णं द्वीपं शिवाभिधम् । जगाम व्रतपोतेन, पुण्यसारो विशारदः ॥ ३३७ ॥ युग्मम् ॥

For Private and Personal Use Only

श्रीसाधर्म्मिकवत्सलत्वविबुध-क्षोणीरुहोऽप्यङ्कुरा,-देकस्मादपि भोजनादिति रमां रूपं च कामान् मतान् ।
आरोग्यं कुलमुत्तमं सुभगतां संप्राप पुण्यैर्धनै,-र्भारं भारमिहात्मलक्ष्मिसदनं श्रीपुण्यसारोऽसकौ ॥ ३३८ ॥

ये तु श्रीभरतेशवत्प्रतिदिनं नानाऽन्नवस्त्रादिभिः,
श्रीवज्रायुधभूपतेश्च विपदुद्धारेण रामेन्दुवत् ।
श्रीसाधर्म्मिकवत्सलत्वदिविषद्वृक्षं सुधौघै रसैः,
सिक्त्वा पुण्यफलोत्तमं विदधते किं किं न तेषां भवेत् ? ॥ ३३९ ॥

दौर्गत्यच्छिदुरं महोदयकरं विश्वत्रयीश्रीभरा,-
धारं प्रीतिनिबन्धनाऽधिगमनं निष्पुण्यकैर्दुर्लभम् ।
विश्वाद्यं(लं)करणं सदाऽऽदरपरा भव्या अदः प्रत्यहं,
वात्सल्यं समधर्मणां नयत भोः ! स्वाधीनताशेवधिम् ॥ ३४० ॥

वर्षे त्रयोदशशते चतुरुत्तरे च, त्रिंशत्तमे( १३३४ ) प्रथमकार्त्तिकपूर्णिमायाम् ।
श्राग् वाचनागणिविवेकसमुद्र एतां, चित्रां कथां व्यधित जेसलमेरुदुर्गे ॥ ३४१ ॥
षट्तर्कसिद्धान्तपयोधिकुम्भजै,-र्वादीभसिंहैः शु(शुचि)लब्धिवार्द्धिभिः ।
कथाऽसकौ श्रीमुनिराजनायकै,-र्जिनप्रबोधप्रभुभिः प्रशोधिता ॥ ३४२ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति श्रीजिनेश्वरसूरिशिष्यवाचनाचार्यविवेकसमुद्रगणिविरचितं श्रीसाधर्म्मिकवात्सल्यफल-
लेशाविर्भावकं श्रेष्ठिपुत्र-पुण्यसारकथानकं समाप्तम् ॥

एवं ग्रन्थाग्रम् ३४८

॥ इति संपूर्णम् ॥

For Private and Personal Use Only